## *नवग्रह मन्त्र*

### सूर्य ग्रह

आ कृष्णेन रज॑सा वर्त॑मानो निवेशय᳚न्नमृतं मर्त्यं᳚ च ।
हिरण्ये᳚न सविता रथेना देवो᳚याति भुव॑नानि पश्या॑ ॥१॥

अग्निं दूतं वृ॑णे महे होता᳚रं विश्ववे᳚दसम्
अस्य यज्ञस्य सुकृतु᳚म् ॥२॥

कदृद्राय प्रचे᳚तसे मिळ्ळुष्ट॑माय तव्य॑से
वोचेम शं॑तमं हृदे ॥३॥

जपाकुसुम संकाशं काश्येपयं महद्युतिम्
तमोरिं सर्व पापघ्नं प्रणतोस्मि दिवाकरम्

भगवंतं सूर्यं प्राङ्गमुखं रक्तवर्णं रक्तमाल्यांबरधरं रक्त छत्र ध्वजपताकोपशोभितं सप्ताश्व रथवाहनेन दिव्यं मेरुं प्रदक्षणी कुर्वाणं ग्रह मंडले प्रविष्टं सांगं सायुधं सवाहनं सशक्ति सपत्नि सपुत्र सपरिवार शोभितं ग्रहाणां मध्ये वर्तुलाकार मंडले गोधूम धान्यस्योपरि भगवंतं अधिः प्रत्यधि देवता सहितं अस्मिन् धान्ये अस्मिन् कुंभे अस्मिन् बिंबेच ओं भूः ओं भुवः ओं स्वः ओं भूर्भुवस्वः सूर्यग्रहं आवाहयामि । सूर्याधिदेवतां अग्निं आवाहयामि सूर्यः प्रत्यधि देवतां रुद्रं आवाहयामि स्थापयामि पूजयामि ॥ सुरभिरमृते करोमि ।

## चंद्र ग्रह

आप्यायस्व समेतु ते विश्वतस्सोम वृष्णम् ।
भवा वाजस्य संगथे ॥ १॥

अप्सु मे सोमा अब्रवीदंत विश्वाणि भेषजा ।
अग्निं च विश्वशंभुवं ॥२॥

गौरीमिमार्या सलिलानि तक्षत्येकपति द्विपदि सा चतुष्पदि ।
अष्टापदि नवपदि बभूवुषी सहस्राक्षारा परमे व्योमन् ॥३॥

भगवंतं सोमं प्रत्यङ्ग्मुखं श्वेतवर्णं श्वेतमाल्यांबरधरं श्वेत छत्र ध्वजपताकोपशोभितं श्वेताश्व रथ वाहनेन दिव्यं मेरुं प्रदक्षणी कुर्वाणं ग्रह मंडले प्रविष्टं सांगं सायुधं सवाहनं सशक्ति सपत्नि सपुत्र सपरिवार शोभितं सूर्य ग्रहस्य आग्नेय दिग्भागे समचतुरश्चाकार मंडले तंडुल धान्यस्योपरि भगवंतं अधि: प्रत्यधि देवता सहितं अस्मिन् धान्ये अस्मिन् कुंभे अस्मिन् बिंबेच ओं भू: ओं भुव: ओं स्व: ओं भूर्भुवस्व: सोमग्रहं आवाहयामि । चंद्राधिदेवतां अप्सुं आवाहयामि चंद्र: प्रत्यधि देवतां गौरीं आवाहयामि स्थापयामि पूजयामि ॥ सुरभिरमृते करोमि ।

## मंगळ ग्रह

अग्निर्मूर्धा दिव: ककुत्पति: पृथिव्या अयम् ।
अपां रेतांसु जन्वति ॥१॥

स्योना पृथिवी भवा अनृक्षरा निवेशनी
यच्छान शर्म सप्रता: ॥२॥

कुमारं माता युवतिस्समुब्धं गुहा बिभर्ति नददाति पित्रे
अनेकमस्य नमिनज्जनासहपुरः पश्यंति निहितमरतौ ॥३॥

भगवंतं अंगारकं दक्षिणाभि मुखं रक्तवर्णं रक्तमाल्यांबरधरं रक्त छत्र ध्वजपताकोपशोभितं रक्तमेश रथ वाहनेन दिव्यं मेरुं प्रदक्षणी कुर्वाणं ग्रह मंडले प्रविष्ठं सांगं सायुधं सवाहनं सशक्ति सपत्नि सपुत्र सपरिवार शोभितं सूर्य ग्रहस्य दक्षिण दिग्भागे त्रिकोणाकर मंडले आडक धान्यस्योपरि भगवंतं अधिः प्रत्यधि देवता सहितं अस्मिन् धान्ये अस्मिन् कुंभे अस्मिन् बिंबेच ओं भूः ओं भुवः ओं स्वः ओं भूर्भुवस्वः अंगारक ग्रहं आवाहयामि । अंगारकं अधिदेवतां भूमिं आवाहयामि अंगारक प्रत्यधि देवतां स्कंदं आवाहयामि स्थापयामि पूजयामि ॥ सुरभिरमृते करोमि ।

## बुध ग्रह

उद्बुद्ध्यध्वं समन्नस खायस्स्मग्नि मिन्द्धं बहवस्स नीळाः ।
दधिक्रामग्निमुषसं च देवीमिंद्रा वर्तोवसे निह्वये वहा ॥१॥

इदं विष्णुविचक्रमे त्रेधा निदधे पदम् ।
समूळ्हमस्य पांसुरे ॥२॥

सहस्रशीर्षा पुरुषस्सहस्राक्ष सहस्रपात् ।
सभूमिं विश्वतोवृत्वा अत्यतिष्ठत् दशांगुळम् ॥३॥

भगवंतं बुधं उदन्मुखं पीतवर्णं पीतमाल्यांबरधरं पीत छत्र ध्वजपताकोपशोभितं सिंह रथ वाहनेन दिव्यं मेरुं प्रदक्षणी कुर्वाणं ग्रह मंडले प्रविष्ठं सांगं सायुधं सवाहनं सशक्ति सपत्नि सपुत्र सपरिवार शोभितं सूर्य

ग्रहस्य ऐशान्य दिग्भागे बाणाकार मंडले मुद्ग धान्यस्योपरि भगवंतं अधि: प्रत्यधि देवता सहितं अस्मिन् धान्ये अस्मिन् कुंभे अस्मिन् बिंबेच ओं भू: ओं भुवः ओं स्वः ओं भूर्भुवस्वः बुध ग्रहं आवाहयामि । बुधाधिदेवतां विष्णुं आवाहयामि बुध: प्रत्यधि देवतां पुरुषं आवाहयामि स्थापयामि पूजयामि ॥ सुरभिरमृते करोमि ॥

## गुरु ग्रह

बृहस्पते अति यदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु ।
यद्धीदयद्धवस ऋतप्रजात तदस्मासु द्रविणं देहि चित्रम् ॥१॥

इंद्रश्रेष्ठानि द्रविणानि देहि चित्तिं दक्षस्य सुभगत्व मस्मे ।
पोषं रयीणा मरिष्टिं तनूनां स्वाद्मानं वाचस्सु दिनत्वमह्नाम् ॥२॥

ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमाद आशू ।
स्थिरं रथं सुखमिंद्रादि तिष्टन् प्रजाननिँद्वा उप याहि सोमम् ॥३॥

भगवंतं बृहस्पतिं उदन्मुखं पीतवर्णं पीतमाल्यांबरधरं पीत छत्र ध्वजपताकोपशोभितं पीताश्व रथ वाहनेन दिव्यं मेरुं प्रदक्षणी कुर्वाणं ग्रह मंडले प्रविष्ठं सांगं सायुधं सवाहनं सशक्ति सपत्नि सपुत्र सपरिवार शोभितं सूर्य ग्रहस्य उत्तर दिग्भागे दीर्घ चतुरश्राकार मंडले चणक धान्यस्योपरि भगवंतं अधि: प्रत्यधि देवता सहितं अस्मिन् धान्ये अस्मिन् कुंभे अस्मिन् बिंबेच ओं भू: ओं भुवः ओं स्वः ओं भूर्भुवस्वः बृहस्पति ग्रहं आवाहयामि । बृहस्पत्यधिदेवतां इंद्रं आवाहयामि बृहस्पति प्रत्यधि देवतां ब्रह्माणं आवाहयामि स्थापयामि पूजयामि ॥ सुरभिरमृते करोमि ॥

## शुक्र ग्रह

शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासी ।
विश्वाहि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ॥१॥

इंद्राणीमासु नारिषु सुभगा महमश्रवम् ।
नह्यस्य अपरं चन जरसा मरते पतिर्विश्वस्मादिंद्र उत्तरः ॥२॥

इंद्रं वो विश्वतस्परि हवामहे जनेभ्यः ।
अस्माकमस्तु केवलः ॥३॥

भगवंतं शुक्रं प्राङ्ग्मुखं शुक्लवर्णं शुक्लमाल्यांबरधरं शुक्ल छत्र ध्वजपताकोपशोभितं शुक्लाश्व रथ वाहनेन दिव्यं मेरुं प्रदक्षणी कुर्वाणं ग्रह मंडले प्रविष्ठं सांगं सायुधं सवाहनं सशक्ति सपत्नि सपुत्र सपरिवार शोभितं सूर्य ग्रहस्य प्राग्दिग्भागे पंचकोणाकार मंडले निष्पाव धान्यस्योपरि भगवंतं अधिः प्रत्यधि देवता सहितं अस्मिन् धान्ये अस्मिन् कुंभे अस्मिन् बिंबेच ओं भूः ओं भुवः ओं स्वः ओं भूर्भुवस्वः शुक्र ग्रहं आवाहयामि । शुक्राधिदेवतां इंद्राणीं आवाहयामि शुक्रः प्रत्यधि देवतां इंद्रं आवाहयामि स्थापयामि पूजयामि ॥ सुरभिरमृते करोमि ॥

## शनि ग्रह

शमग्नि रग्निभिः शरत्चन्नस्तपतु सूर्या ।
शं वातो वात्वरपा अपस्रिधः ॥१॥

प्रजापते नत्व देतान्न्यन्यो विश्वाजातानि परिताबभूव ।
यत्यामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥२॥

यमाय सोमं सुनुत यमाय जुहुता हविः ।
यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः ॥३॥

भगवंतं शनैश्चरं प्रत्यङ्ग्मुखं नीलवर्णं नीलमाल्यांबरधरं नील छत्र ध्वजपताकोपशोभितं नीलगृध्र रथ वाहनेन दिव्यं मेरुं प्रदक्षणी कुर्वाणं ग्रह मंडले प्रविष्ठं सांगं सायुधं सवाहनं सशक्ति सपत्नि सपुत्र सपरिवार शोभितं सूर्य ग्रहस्य पश्चिम दिग्भागे धनुराकार मंडले तिल धान्यस्योपरि भगवंतं अधिः प्रत्यधि देवता सहितं अस्मिन् धान्ये अस्मिन् कुंभे अस्मिन् बिंबेच ओं भूः ओं भुवः ओं स्वः ओं भूर्भुवस्वः शनैश्चर ग्रहं आवाहयामि । शनैश्चराधिदेवतां प्रजापतिं आवाहयामि शनैश्चरः प्रत्यधि देवतां यमं आवाहयामि स्थापयामि पूजयामि ॥ सुरभिरमृते करोमि ॥

**राहु ग्रह**

कया नश्चित्र आभुवदोती सदा वृधस्सखा ।
कया शचिष्ठया वृता ॥१॥

आयं गौः पृष्निरक्रमीदसदन्मातरं पुरः ।
पितरं च प्रयन्त्वः ॥२॥

परं मृत्यो अनु परेहि पंथां यस्त्वे स्व इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ॥३॥

भगवंतं राहुं दक्षिणाभिमुखं धूम्रवर्णं धूम्रमाल्यांबरधरं धूम्र छत्र ध्वजपताकोपशोभितं कृष्णमेश रथ वाहनेन दिव्यं मेरुं अप्रदक्षणी कुर्वाणं ग्रह मंडले प्रविष्ठं सांगं सायुधं सवाहनं सशक्ति सपत्नि सपुत्र सपरिवार शोभितं सूर्य ग्रहस्य नैऋत्य दिग्भागे शूर्पाकार मंडले माष धान्यस्योपरि भगवंतं अधिः प्रत्यधि देवता सहितं

अस्मिन् धान्ये अस्मिन् कुंभे अस्मिन् बिंबेच ओं भूः ओं भुवः ओं स्वः ओं भूर्भुवस्वः राहु ग्रहं आवाहयामि । राह्वधिदेवता सर्पं आवाहयामि राहुः प्रत्यधि देवतां मृत्युं आवाहयामि स्थापयामि पूजयामि ॥ सुरभिरमृते करोमि ॥

## केतु ग्रह

केतुं कृण्वन्न केतवे पेशो मर्या अपेशसे ।
समुषद्भिरजायथाः ॥१॥

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसी मतस्सुरुचो वेन आवह ।
सबुध्न्या उपमा अस्य विष्ठास्सतश्च योनिमसतश्चविवः ॥२॥

सचित्रचित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम् ।
चंद्रं रयीं पुरुवीरं बृहंतं चंद्र चंद्राभिगृणते युवस्व ॥३॥

त्रयंबकं यजामहे सुगंधिं पुष्टिवर्धनम् ।
उर्वारुकमिव बंधनात् मृत्योर् मुक्षीय माऽमृतात् ॥

आतून इंद्र क्षुमंतं चित्रं ग्राभं संगृभाय ।
महाहस्ती दक्षिणेन ॥

जातवेदसे सुनवाम सोममरातीय तो निदहाति वेदः ।
सनः परुषदति दुर्गाणि विश्वानावेव सिंधुं दुरितात्यग्निः ॥

क्षेत्रस्य पतिनावयं हितेनेव जयामसि ।

गामश्वं पोषयित्वा स नो मृळातीदृशे ॥

क्राणा शिशुर्महीनां हिन्वनृतस्य दीधितम् ।

विश्वा परिप्रिय भुवददद्वित ॥

आदित्प्रत्नस्य रेतसो ज्योतिश्पश्यंति वासरम् ।

परोयदिध्यते दिव ॥

अश्वीनावर्तिरस्मद गोमद्धस्र हिरण्यवत् ।

अर्वाग्रतं समनसा नियच्छतम् ॥

भगवंतं केतुं दक्षिणाभिमुखं चित्रवर्णं चित्रमाल्यांबरधरं चित्र छत्र ध्वजपताकोपशोभितं चित्रकपोत रथ वाहनेन दिव्यं मेरुं अप्रदक्षणी कुर्वाणं ग्रह मंडले प्रविष्ठं सांगं सायुधं सवाहनं सशक्ति सपत्नि सपुत्र सपरिवार शोभितं सूर्य ग्रहस्य वायुव्य दिग्भागे ध्वजाकार मंडले कुळित्त धान्यस्योपरि भगवंतं अधि: प्रत्यधि देवता सहितं अस्मिन् धान्ये अस्मिन् कुंभे अस्मिन् बिंबेच ओं भू: ओं भुव: ओं स्व: ओं भूर्भुवस्व: केतु ग्रहं आवाहयामि । केत्वधि देवतां ब्रह्माणं आवाहयामि केतु: प्रत्यधि देवतां चित्रगुप्तं आवाहयामि स्थापयामि पूजयामि ॥ सुरभिरमृते करोमि ॥

## अष्टदिक्पालक मन्त्र

इंद्रं वो विश्वतस्परि हवामहे जनेभ्य: ।

अस्माकमस्तु केवल: ॥

इंद्रं लोकपालकं आवाहयामि ।

अग्निं दूतं वृ॑णीमहे होता᳚रं विश्ववे॑दसम् ।

अस्य यज्ञस्य॑ सुक्रतुम् ॥

अग्निं लोकपालकं आवाहयामि ।

यमाय सो᳚मं सुनुत यमा॑य जुहुता हविः ।

यमगम् हयज्ञो ग॑च्छत्यग्नि दू॑तो अरं᳚कृतः ॥

यमं लोकपालकं आवाहयामि ।

मोषुणः परा᳚परा निरऋतिर् दुर्हणा᳚ वदीत ।

पदीष्ठ तृष्ण॑या सह ॥

निरऋतिं लोकपालकं आवाहयामि ।

तत्त्वा᳚यामि ब्रह्म॑ण वंदमान स्तदाशा᳚स्ते यजमानो हविर्बिः ।

अहे॑ळमानो वरुणेह बोध्युऋषं समान आयुः प्रमो᳚षीः ॥

वरुणं लोकपालकं आवाहयामि ।

तववाय वृतस्पते त्वष्टु॑र्जामाता रद्भुत ।

अवाम्स्या वृ॑णीमहे ॥

वायुं लोकपालकं आवाहयामि ।

सोमो᳚धेनुं सोमो अर्वं॑तमाषुं सोमो᳚वीरं क᳚र्मण्यं᳚ ददाति ।

साध᳚न्यं विध᳚त्यं सभे᳚यं पितृश्र॑वणं योददा᳚श दस्मै ॥

कुबेरं लोकपालकं आवाहयामि ।

तमीशानं जगतः तस्तुषस्पतिं दियं जिन्वमवसे हूमहे वयम् ।
पूषानो यथावेदसां असधृते रक्षित पायुरदब्दः स्वस्तये ॥
ईशानं लोकपालकं आवाहयामि ।

तत्त्वायामित्यस्य शुनःषेपो वरुणस्त्रिष्टुपु ।

तत्त्वायामि ब्रह्मण वंदमान स्तदाशास्ते यजमानो हविर्बिः ।
अहेळमानो वरुणेह बोध्युत्रूषं समान आयुः प्रमोषीः ॥